श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नृसिंहपुराणे

# ॥ ऋणविमोचननृसिंहस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ ऋणविमोचननृसिंहस्तोत्रम् ॥

देवताकार्यसिद्ध्यर्थं सभास्तम्भसमुद्भवम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ १ ॥

लक्ष्म्यालिङ्गितवामाङ्गं भक्तानां वरदायकम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ २ ॥

आन्त्रमालाधरं शङ्खचक्राब्जायुधधारिणम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ३ ॥

स्मरणात्सर्वपापघ्नं कद्रूजविषनाशनम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ४ ॥

सिंहनादेन महता दिग्दन्तिभयनाशनम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ५ ॥

प्रह्लादवरदं श्रीशं दैत्येश्वरविदारणम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ६ ॥

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ७ ॥

वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिवन्दितम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥ ८ ॥

य इदं पठते नित्यम् ऋणमोचनसञ्ज्ञितम्।
अनृणी जायते सद्यो धनं शीघ्रमवाप्नुयात्॥ ९ ॥

॥ इति ऋणविमोचननृसिंहस्तोत्रम् सम्पूर्णम् ॥

www.prapatti.com